# श्रीमीनाक्षी सुन्दरेश्वरस्तोत्रम्

{॥ श्रीमीनाक्षी सुन्दरेश्वरस्तोत्रम् ॥}

सुवर्णपद्मिनीतटान्तदिव्यहर्म्यवासिने

सुपर्णवाहनप्रियाय सूर्यकोटितेजसे ।

अपर्णया विहारिणे फणाधरेन्द्रधारिणे

सदा नमश्शिवाय ते सदाशिवाय शंभवे ॥ १ ॥

सुतुङ्गभङ्गजान्हुजासुधांशुखण्डमौलये

पतङ्गपङ्कजासुहृत्कृपीटयोनिचक्षुषे ।

भुजङ्गराजकुण्डलाय पुण्यशालिबन्धवे

सदा नमश्शिवाय ते सदाशिवाय शंभवे ॥ २ ॥

चतुर्मुखाननारविन्दवेदगीतमूर्तये

चतुर्भुजानुजाशरीरशोभमानमूर्तये ।

चतुर्विधार्थदानशौण्डताण्डवस्वरूपिने

सदा नमश्शिवाय ते सदाशिवाय शंभवे ॥ ३ ॥

शरन्निशाकरप्रकाशमन्दहासमञ्जुला $-$

धरप्रवालभासमानवक्त्रमण्डलश्रिये ।

करस्फुरत्कपालमुक्तविष्णुरक्तपायिने

सदा नमश्शिवाय ते सदाशिवाय शंभवे ॥ ४ ॥

सहस्रपुण्डरीकपूजनैकशून्यदर्शना

सहस्वनेत्रकल्पितार्चनाच्युताय भक्तितः ।

सहस्रभानुमण्डलप्रकाशचक्रदायिने

सदा नमश्शिवाय ते सदाशिवाय शंभवे ॥ ५ ॥

रसारथाय रम्यपत्रभृद्रथाङ्गपाणये

रसाधरेन्द्रचापशिञ्जिनीकृतानिलाशिने ।

स्वसारथीकृताजनुन्नवेदरूपवाजिने

सदा नमश्शिवाय ते सदाशिवाय शंभवे ॥ ६ ॥

अतिप्रगल्भवीरभद्रसिंहनादगर्जित

श्रुतिप्रभीतदक्षयागभोगिनाकसद्मनाम् ।

गतिप्रदाय गर्जिताखिलप्रपञ्चसाक्षिणे

सदा नमश्शिवाय ते सदा शिवाय शंभवे ॥ ७ ॥

मृकण्डुसूनुरक्षणावधूतदण्डपाणये

सुगण्डमण्डलस्फुरत्प्रभाजितामृतांशवे ।

अखण्डभोगसम्पदर्थिलोकभावितात्मने

सदा नमश्शिवाय ते सदा शिवाय शंभवे ॥ ८ ॥

मधुरिपुविधिशक्रमुख्यदेवैरपि नियमार्चितपादपङ्कजाय ।

कनकगिरिशरासनाय तुभ्यं रजतसभापतये नमः शिवाय ॥ ९ ॥

हालास्यनाथाय महेश्वराय हालाहलालङ्कृतकन्धराय ।

मीनेक्षनायाः पतये शिवाय नमो नमः सुन्दरताण्डवाय ॥ १० ॥

त्वया कृतमिदं स्तोत्रं यः पठेद्भक्तिसंयुतः ।

तस्याऽऽयुर्दीर्घमारोग्यं सम्पदश्च ददाम्यहम् ॥ ११ ॥

Encoded by Subramanian Ganesh \

From hAIAsya mahAtmiyam.

Please send corrections to sanskrit@cheerful.com

Last updated त्oday

http://sanskritdocuments.org

Meenakshi Sundareshwara Stotram Lyrics in Devanagari PDF
% File name : minsundereshvara.itx
% Location : doc_devii
% Author : Traditional
% Language : Sanskrit
% Subject : philosophy/hinduism/religion
% Transliterated by : Subramanian Ganesh sgesh at hotmail.com
% Proofread by : Subramanian Ganesh sgesh at hotmail.com
% Latest update : March 15, 2001
% Send corrections to : Sanskrit@cheerful.com
% Site access : http://sanskritdocuments.org
%
% This text is prepared by volunteers and is to be used for personal study
% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.

% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.
PDF file is generated [ October 13, 2015 ] at Stotram Website